National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 290-293
© 2026 NJHSR
www.sanskritarticle.com

**दुर्गाप्रसाद पण्डा**
शिक्षाशास्त्रविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपति

**Correspondence:**
**दुर्गाप्रसाद पण्डा**
शिक्षाशास्त्रविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपति

# वेदपाठशालासु E-Learning

**दुर्गाप्रसाद पण्डा**

**प्रस्तावना**

भारतस्य सांस्कृतिकपरम्परायाः मूलाधाररूपेण वेद प्रतिष्ठितः। यत्र समग्रं जीवनदर्शनं, तत्त्वज्ञानम्, धर्मः, संस्काराः च सूत्ररूपेण उपदिश्यन्ते। एषा परम्परा सहस्रवर्षात् **गुरु-शिष्यपरम्परया** जीविता अस्ति। परम्परागतपद्धत्या वेदाध्ययनम् श्रवणेन, मननेन, पाठेन च सम्पद्यते स्म।

वर्तमाने तु जगति तीव्रं **प्रौद्योगिकीपरिवर्तनम्** अभवत्। यत्र **ई-लर्निङ् (E-learning)** इत्याख्यं शिक्षापद्धतिः समग्रे विश्वे प्रवर्तते। अयं नवपर्यायः न केवलं आधुनिकशास्त्राणाम् अध्ययने, अपितु परम्परागतविद्यायाम् अपि उपयुक्तः भविष्यति।

E-learning इत्यस्य अर्थः ई= यान्त्रिक लर्निङ्= अधिगमः अर्थात् यान्त्रिक वस्तुनां सहायेन दूरे स्थित्वापि अधिगम सम्पादनम्। पारम्परिक वेदाध्ययनं गुरुकुलप्रणाल्या गुरुशिष्ययोः मौखिकरित्या चलति। किन्तु अद्यतनकाले, सूचनाप्रौद्योगिक्याः साहाय्येन वेदाध्ययनस्य प्रसारणं, संरक्षणं, शिक्षणं च डिजिटल माध्यमेन सम्पादयितुं शक्यते।

**पाठशालानां प्रकाराः**

१ गृहस्थाश्रमाधीनाः पाठशालाः – कुञ्चिकावन्तः, सीमितछात्राः।

२ संस्थानाधीनाः गुरुकुलानि – सम्पूर्णकालिकं शिक्षणं।

३ मठ-सम्बद्धाः पाठशालाः – धार्मिकसंस्थाभ्यः पोषिताः।

**गृहस्थाश्रमाधीनाः पाठशालाः**

प्रायशः दक्षिणभारतस्य आन्ध्रप्रदेशे **तिरुमाला तिरुपति देवस्थानाधिने** इयं परम्परा दरीदृश्यते। तत्र गुरुः स्वकीयेन पुत्रेण सह वन्धुजनानां पुत्रान् वा वेदमध्यापयति। अत्र शिष्याणां संख्या सीमिता भवेत्। अर्थात् पञ्चाधिकः शिष्याः न भवेयुः।

**संस्थानाधिनानि गुरुकुलानि**

अस्यां प्रणाल्यां भगवतः श्रीकृष्णस्य गुरुः महर्षिसान्दिपनिः, तेषां नाम्ना **महर्षि सान्दिपनि राष्ट्रिय वेदविद्या प्रतिष्ठान उजैन** इत्यनया संस्थया आभारतं इदानितनकाले वेदपाठशालाः सञ्चाल्यन्ते। अस्याः संस्थायाः अधिने बहवः वेदपाठशालाः परिचाल्यन्ते। पाठशालासु स्थितानां शिष्याणां आवासः, भोजनं, वस्त्रं, पाठ्यचर्या, छात्रवृत्तिः, उपाधिः च नियमितरुपेण इयं संस्था प्रयच्छति। न्यूनातिन्यूनं दशाधिकशिष्याः भवेयुः। अत्र शिष्यसंख्या सिमिता न भवति। पाठशालासु परिक्षया शिष्याः प्रविशन्ति। सप्तवर्षात्मकं पाठ्यक्रमं प्रचलति।

**मठ-सम्बद्धाः पाठशालाः**

अस्यां प्रणाल्यां मठसंस्थयोः मिलिततत्त्वावधानेन काश्चन पाठशालाः सञ्चाल्यन्ते। अत्र मठैः शिष्याणां भोजनं, आवासः,वस्त्रादिकं प्रदीयते तथा च संस्थया शिष्याणां पाठ्यचर्यानिर्माणम्, उपाधिप्रदानञ्च क्रीयते। अत्रापि न्यूनातिन्यूनं दशाधिकशिष्याः भवेयुः। अधिकाधिकं मठाधिनं भवति। अत्र शिष्यसंख्या सिमिता न भवति। पाठशालासु परिक्षया शिष्याः प्रविशन्ति। सप्तवर्षात्मकं पाठ्यक्रमं प्रचलति। विशेषतया अत्र भारतीयप्राचीनगुरुकुलपरम्पारापद्धत्या वेदाध्ययनं भवति।

**पाठ्यचर्याः**

वेदपाठशालासु शिष्याः प्रातः आरभ्य रात्रिपर्यन्तं प्रतिदिनं किं कुर्वन्ति कक्ष्या कथं चलति इत्यादिपाठ्यचर्याद्वारा निर्धार्यते। प्रातः शय्यात्यागः, प्रातस्स्मरणम्, स्नानम्, सन्ध्यावन्दनम्, वेदावृत्तिः,

अल्पाहारः, कक्ष्या, तत्रैव मध्याह्नभोजनं पुनः कक्षा, सायंक्रिडा, सायं सन्ध्यावन्दनम्, स्वाध्यायः, रात्रिभोजनं तदनु शयनम् । प्रायशः वेदपाठशालासु शिष्याः आवासिकरुपेण तिष्टन्ति। सर्वासां पाठशालानां पाठ्यचर्याः समानाः। अत्र पाठपद्धतिः किदृशी इति अधोल्लिख्यन्ते-

**पाठपद्धतिः**

- **श्रुति-परम्परा –** गुरुणा पाठिताः मन्त्राः शिष्यैः शुद्धरूपेण श्रुत्वा अथवा पुस्तकं दृष्ट्वा स्मर्य्यते ।
- **स्वरसन्धानम् –** उच्चारणे दीर्घः, ह्रस्वः, प्लुतः, अनुनासिकः, उदात्तः, अनुदात्तः, स्वरितः इत्यादीनां सूक्ष्मतया विचार्यन्ते।
- **नियमिताचारः –** प्रातःस्नानम्, यज्ञोपवीतधारणम्, आचारः, कक्ष्यानियमाः गुरुशुश्रुषाश्च परीपाल्यन्ते।
- **कण्ठस्थिकरणम्-** पाठशालासु मन्त्रान् श्रुत्वा कण्ठस्थिकरणे एव प्रधान्यं दीयते।
- **व्याख्यानम्-** अन्येषां विषयाणां गुरुपरम्परापद्धत्या आचार्याः शिष्यान् व्याख्यानेन अवबोधयन्ति।
- **प्रतिव्याख्यानम्-** अधितानां मन्त्राणां, तथा अन्यशास्त्रियविषयाणाञ्च प्रत्ऽहम् शिष्यैः प्रितिव्यखानं प्रदियते।
- **परीक्षा-** शास्त्राणां मन्त्राणां परीक्षा मौखिकपद्धत्या तथा च इतरसामान्यविषयाणां लिखितपद्धत्या भवति।

**यान्त्रिकाधिगमः(E-learning)**

**ई-लर्निङ् इत्यस्य परिभाषा**

ई-लर्निङ् (E-learning) इति शिक्षापद्धतिः डिजिटल्-जालमाध्यमेन (internet), संगणकयन्त्रेण, दूरवाणी प्रणाल्या च छात्रान् बोधयति।

आधुनिके युगेऽस्मिन् यान्त्रिकपद्धत्या अधिगमः सर्वत्र प्रचलति। अयम् अधिगमः विज्ञानस्य एकः अंशः। प्रायशः विद्यालयेषु करोनान्तरं आध्यापकाः दृश्योपकरणस्य (सङ्गणक,प्रोजेक्टर) प्रयोगं कृत्वा अध्यापनं कुर्वन्ति। विगतपञ्चवर्षेभ्यः अधिगमे यान्त्रिकोपगमस्य प्रभावः अधिकः दृश्यते। करोनासमये सर्वकारस्य नियमानुगुणं सर्वत्र पिहितम् (Lockdown) आसीत्। तदानीं विद्यालयेषु शिक्षणं स्थगितं जातम्। छात्राणां अध्ययनस्थगनसमस्यायाः समाधानार्थं विद्वद्भिः उपायत्वेन **अन्तर्जालशिक्षा** इति काचन व्यवस्था प्रारब्धा। ततः बहुषु क्षेत्रेषु अन्तर्जालमाध्यमेन कार्यक्रमाः सञ्चाल्यन्ते। तदारभ्य **यान्त्रिकाधिगमस्य** नूतनयुगः प्रारब्धः इति अस्मभिः वक्तुं शक्यते। यन्त्राणां प्रयोगेण अधिगमः सुगमः, समयस्य न्यूनता, विषयोपस्थापने सरलता, दूरे स्थित्वा अन्तर्जालमाध्यमेन पठनपाठनं च भवति। यन्त्राणां प्रयोगद्वारा सम्प्रतिके काले अध्ययनः सुकरः भवति । परन्तु वेदपाठशालासु एतादृशि व्यवस्था एतावता न एव कल्पिता। तत्र यान्त्रिकाधिगमव्यवस्थां कल्पयन् वेदाध्ययने सरलता, तस्याः व्यवस्थायाः उपयोगः वेदपाठशालासु भवति वा न वा इत्ययं विचारः तथा तस्याः व्यवस्थायाः लाभहानीश्च यथानुसन्धानं विचार्यन्ते।

**वेदपाठशालासु यान्त्रिकाधिगमस्य उपयोगः**

पारम्परिकगुरुकुलपद्धत्याः ई-लर्निङ् प्रणाली अद्य युगानुसारं समुचितं माध्यमं दृश्यते। विश्वेऽस्मिन् बहवः विद्यालयाः, महाविद्यालयाः, विश्वविद्यालयाः च ई-लर्निङ् पद्धत्या शिक्षां ददति। वेदपाठशालाः अपि न केवलं अस्य प्रवाहस्य भागः भवन्ति, अपितु स्वसंस्कृतेः विस्तारं च कर्तुं एषां प्रयोगं कुर्वन्ति।

वेदपाठशालासु सर्वत्र गुरुणां पुरतः स्थित्वा शिष्याणाम् अधिगमः जायते। मन्त्राणामध्ययनम् अध्यापनं च तन्त्र (Application) माध्यमेन सम्पाद्यते चेत् कदाचित् श्रवणदोषाः स्युः। अधुना आभारतम् अन्तर्जालव्यवस्था (Internet System) यथा अपेक्षते तथा वेगेन नोपलभ्यते। तेन अध्ययनकाले काश्चन समस्याः उत्पद्यन्ते यथा- उच्चारणं, गुरुलघुवर्णदोषः, हस्तस्वरदोषः इत्यादयः, येषां समाधानार्थम् उपायाः आदौ चिन्तनीयाः। यन्त्राणां प्रयोगं कृत्वा वेदाध्ययनं पाठशालासु कियान्नुपयोगाय भवति इत्यस्मिन् विषये अधः चर्च्यते।

**यान्त्रिक-अधिगमस्य वैशिष्ट्यम्**

- **सर्वत्रसुलभता –** विश्वस्य कस्मिन् अपि भागे शिष्याः तिष्ठन्तः अन्तर्जालमाध्यमेन अध्ययनं कर्तुं शक्नुवन्ति।
- **अध्ययनसमयनिर्धारणम् –** शिष्यः स्वेच्छया शिक्षायाः समयं निश्चिनोति।
- **श्रव्य-दृश्यसामग्री –** पाठाः विडियोरूपेण, ऑडियोरूपेण वा लिखितरूपेण सुलभेन उपलभ्यन्ते।
- **LMS प्रणाली –** Moodle, Google Classroom, Google meet, Zoom, Whatsapp इत्यादीनि शिक्षाप्रवन्धन-साधनानि भवन्ति।

**यान्त्रिक-अधिगमस्य लाभाः**

1. **सर्वत्रगम्यता (Accessibility):** छात्राः दूरे स्थित्वाऽपि अन्तर्जालमाध्यमेन वेदाध्ययनं कर्तुं शक्नुवन्ति। विदेशेषु अपि ये भारतसंस्कृत्यनुरक्ताः, ते अपि ई-पाठशालामाध्यमेन वेदाध्ययनं कर्तुं शक्नुवन्ति।

2. **सङ्ग्रहणं (Archiving):** वेदमन्त्राः ऑडियो-विडियोरूपेण सुरक्षिताः भवन्ति। कदाचित् समयेन कक्षां न स्वीकुर्वन्ति चेत् अनन्तरकालेऽपि सुरक्षितान् पाठान् शिष्याः अध्येतुं शक्नुवन्ति। शुद्धस्वरयुक्ताः पाठाः ध्वनिरूपेण संरक्षिताः सन्ति। अनेन दुर्लभाः शाखाः अपि दीर्घकालं यावत् सुरक्षिताः स्युः।

1. **पुनःपाठन-सुविधा (Repetition):**

पाठान् पुनः पुनः अध्येतुं शक्नुवन्ति। विस्मृतस्य अपि विषयस्य पुनरावलोकनेन महान्नुपकाराय भवति। देश-विदेशस्थेभ्यः छात्रेभ्यः पाठस्य उपलब्धता सरलेन भवति।

3. **विश्वविस्तारिता (Global Reach):**

भारतीयाः विदेशस्थाः अपि पाठं अध्येतुं शक्नुवन्ति। अनेन वेदस्य प्रचारप्रसारश्च वैश्विकरुपेण भवितुम् अर्हति।

4. **संवर्धनम् (Preservation):**

शास्त्राणि, पाण्डुलिप्यादयः लुप्तप्रायाः सन्ति। लुप्तप्रायाणां शाखानां पाठाः ई-रूपेण(E-book, pdf, Video, Audio,) सुरक्षिताः भवन्ति।

**5. समयसुलभता (Flexibility)** पाठाः रेकॉर्ड्-रूपेण अपि उपलभ्यन्ते, अतः शिष्याः स्वस्य समयानुसारम् अध्ययनं कर्तुं शक्नुवन्ति। तेन अधिगमः शिष्याधिनः भवति।

**6. संख्या-वृद्धिः** एकेनापि आचार्येण सहस्राधिकान् छात्रान् एकस्मिन् काले विना बिघ्नेन पाठयितुं शक्यते। इदं परम्परायाः नूतनव्यवस्था भवति।

7. **स्वयंशिक्षणम्** (self-paced learning) ध्वनिरुपेण स्थितान् सुरक्षितान् विषयान् श्रुत्वा शिष्याः स्वयम् अध्येतुं शक्नुवन्ति।

**यान्त्रिक अधिगमस्य समस्याः**

**1. उच्चारणदोषः**

प्रत्यक्षशिक्षकं विनाः शिष्यैः कदाचित् उच्चारणे दोषाः कर्तुं शक्यन्ते। वेदपाठे ये सूक्ष्मस्वरभेदाः वर्तन्ते, ते यथावत् नावलोक्यन्ते चेत् पाठस्य अशुद्धता भवति। यथा प्लुतस्वरः, गुँ इत्यस्य उच्चारणम्, सन्धियुक्त वर्णानाम् उच्चारणम्। एतदृशाः दोषाः सम्भाव्यन्ते।

**2. प्रविधिबाधा (Tech Barrier)**

केचित् आचार्याः प्रौद्योगिकीप्रणालीनां (Zoom, Google Meet, Google classroom) उपयोगे कुशलाः न सन्ति। प्रायशः गुरुकुलपरम्पराचार्याः प्रद्योगिकि-उपकरणानां सर्वांशेन उपयोगं कर्तुं न शक्नुवन्ति। तेन शिष्याणां अधिगमे समस्याः उत्पद्यन्ते।

**3. संवादविहीनता**

गुरुकुलपरम्परासु प्रत्यक्षेणैव गुरु-शिष्ययोः संवादः पाठश्च सञ्जायते। एतादृश्या प्रणाल्या पाठरारभ्यते चेत् अधिगमः सुष्ठुतया न स्यात्।

**4. नैतिकशिक्षायाः न्यूनता**

गुरुकुलेषु विशेषतया शिष्याः आचारशिक्षा, आत्मानुशासनं, इन्द्रियसंयमः, दिनचर्याः, गुरुशुश्रुषा, प्रायोगिकमन्त्रविधानः, समाजसेवा, त्रीसन्ध्या, गायत्रीजपम् इत्यादिन् नैतिकशिक्षां प्राप्नुवन्ति। दूरे तिष्ठन्तः अन्तर्जालमाध्यमेन शिष्याः पाठशालायासु शिक्षणं प्राप्नुवन्ति चेत् नैतिकशिक्षाणां पूर्वोक्तानाम् अभावः कदाचित् परिलक्ष्यते। गुरुकुलेषु नैतिकशिक्षैव प्रधानभूता। परन्तु तादृश्याः नैतिकशिक्षायाः अभावे गुरुकुलपरम्परायाः महत्त्वं नष्टं स्यात्।

**5. प्रद्योगिकिनां दूरुपयोगः**

प्रद्योगिकिनां उपयोगेन यथा अधिगमे सरलता परिलक्ष्यते तथा शिष्याः तस्य दुरूपयोगमपि कर्तुं शक्नुयुः। यथा- कक्षायाः मध्ये इतरकार्येषु संलग्नः, उत्तराणि न यच्छन्ति, श्रुत्वा अपि अश्रुतम् इति अन्तर्जालसमस्या कथयन्ति, अधिगमे अवहेलनम्, इत्यादयः दुरूपयोगाः परिलक्ष्येयुः।

6. **इतरवाह्य समस्याः-**

कक्षासमये वाह्यपरिवेशात् अनपेक्षितध्वनिनां श्रवणम्, मध्ये मध्ये दूरवाणी आगमनम्, परिवारे कोलाहलः, परिवेशः सम्यक् नास्ति, जाल-जालकस्य समस्याः, दूरवाणीक्रयणे धनस्य समस्याः, प्रविधि चालन इत्यादयः समस्याः दृश्यन्ते।

**वेदपाठशालासु E-learning उपयोगनिर्माणं कथं करणीयम्?**

| तत्त्वम् | विवरणम् |
|---|---|
| पाठ्यविभागः | ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः, तेषां शाखाश्च, पद,-क्रम-जटा-घन-रेखा-शिखा-माला-रथ, निघण्टु, षडङ्गाः, उपाङ्गाः, उपनिषदादयः। |
| माध्यमानि | Zoom, Google Meet, YouTube Live, LMS, Moodle, Google Classroom. |
| सामग्री | ऑडियो, विडियो पाठः, pdf सूक्तानि, उच्चारण अभ्यासः च। |
| प्रशिक्षकाः | वेदपाठी आचार्याः, पाठान्ते संशोधनं, प्रतिव्याख्यानं च। |
| प्रमाणपत्रं | पाठसमाप्तेः अनन्तरं परिक्षाः क्रियन्ते, प्रमाणपत्रं च प्रदीयते। |
| समयसारणी | प्रात:कालपाठ:, सायंकालपाठ:, सप्ताहे 2/3 दिनानि। |

**उपलब्धानि संसाधनानि(E- Learning Tools & Platforms)**

| साधनम् | विवरणम् |
|---|---|
| **YouTube Channels** | Vedadhara, Sanskrit Todays, Swarna Veda Foundationl |
| **Mobile Apps** | "Vedic chant" "Sanskrit daily" "Chinmaya Veda" |
| **Websites** | VedicHeritage.gov.in, sanskritdocuments.orgl |
| **Online gurukulas** | Kanchi kamkoti vedashala online, |
| | Chinmaya international foundation, |

**E-learning वेदपाठशालायाम् यः परिवर्तनः जातः**

- डिजिटल माध्यमेन वेदाध्ययनस्य प्रसारः।
- ऑनलाइन कक्ष्याः, ऐप्स्, YouTube पाठाः।
- छात्राः गृहे स्थित्वा अपि वेदं पठन्ति।

**वर्तमाने प्रचल्यमानाः डिजिटल्-वेदपाठशालाः**

**श्रीशृङ्गेरि शारदापीठम् (Sringeri Math)**

- Zoom माध्यमेन प्रतिदिनं वेदपाठः आयोज्यते।
- YouTube channel द्वारा वेदपाठः प्रसरति।
- सर्वे शिष्याः भारतदेशे विविधराज्येभ्यः अन्तर्जालमाध्यमेन प्रतिदिनं कक्षां स्विकुर्वन्ति।
- आचार्याः यथाविधि वेदाध्यापनं कुर्वन्ति।
- एतत् सर्वं भगवन्भारतीतीर्थमहास्वामिभिः तत्त्वावधानेन सञ्चाल्यते।

**काञ्चीकामकोटिपीठम् (Kanchi Kamakoti Peetham)**

- शाखाविशिष्टं वेदाध्ययनं यथाविधिः एतैः परिचाल्यन्ते।
- पाठाः YouTube माध्यमेन उपलभ्यन्ते।
- LMS (Learning Management System) प्रणालीद्वारा पाठ्यक्रमं संरचयन् शिष्यान् अवबोधयन्ति।
- पाठानन्तरं अत्रैव परीक्षा अपि चाल्यते।
- योग्यता अनुसारं मूल्याङ्कनप्रणालि अपि विद्यते।

**वेदधारा संस्थानम् (Vedadhara Foundation)**

- YouTube, Podcasts, Zoom इत्येतेषां सर्वेषां माध्यमेन शिष्यान् प्रचोदयन्ति।
- प्रतिदिनं मंत्रपाठस्य सत्राणि आयोज्यन्ते।
- प्रवचनमालाः, विशेष-सप्ताहाः, जिज्ञासाविश्लेषणं च।

**चिन्मय इंटरनॅशनल फाउंडेशन (CIF)**

- इयं संस्था वेदाध्ययनाय ई-पाठशालां चालयति।
- अत्र संस्कृतपाठेनेन सह वेदाध्ययनम् अपि चलति।
- अस्यां संस्थायां Online Offline सम्मिश्रपद्धतिद्वारा पाठः पाठ्यते ।
- बहवः प्रमाणपत्र पाठ्यक्रमाः एताभिः संस्थाभिः आयोज्यन्ते।
- सर्वेषां परिक्षाणां प्रमाणपत्रं एताभिः प्रदीयते।

विश्लेषणात्मक: दृष्टिकोण:

| पक्ष: | लाभा: | बाधा |
|---|---|---|
| विद्यार्थिन: | सरलेन अध्ययनम् | आत्मविनिमयस्य अभाव:, असंलग्नता |
| आचार्य: | बहुजनशिक्षणाय अवसर: | तन्त्रज्ञानस्य अपरिचय: |
| संस्था | प्रसारप्रतिष्ठा: च | संसाधनविनियोगस्य आवश्यकता |

**भाविवेदपाठशालायाः नूतनविधिः "डिजिटल् गुरुकुलम्"**

***सम्मिश्र-शिक्षणपद्धतिः (Blended Learning)***

- प्रत्यक्षकक्ष्याभिः सह ई-लर्निङ् यान्त्रिकाधिगमसाधनानां सम्मिलनम्।
- गृहकार्यं, परीक्षणम्, पुनरावलोकनं च इत्यादिनि कार्याणि समकालेनैव यान्त्रिकाधिगमेन सम्भाव्यन्ते।

***स्वरसंशोधकप्रणाली (Pronunciation Assist Tools)***

- कृत्रिमबुद्ध्या (AI) आधारितस्य उपकरणस्य प्रयोगः।
- येन कृत्रिमबुद्धी (AI) छात्राणां पाठदोषान् चिनोति।

- Svara-recognition system द्वारा शिक्षायाः गुणवत्ता सुनिश्चितं क्रियते।

*शिष्यसंवादमंचः (Interactive Student Forum)*

- LMS (Learning Management System) प्रणालीद्वारा अध्येतृणां शंका-समाधानाय व्यवस्था वर्तते।
- "Live Learning Q & A" चर्चा, समस्यानां समाधानार्थं सत्राणि स्थाप्यन्ते।
- संगोष्ठिः (Seminar) शिष्याणां आत्मचिन्तस्य अभिवृद्धये आयोज्यते।

*सार्वभौमिक पाठ्यक्रमः (MOOCs)*

- Vedic MOOCs (Massive Open Online Courses) इत्ययं पाठ्यक्रमः आविश्वं स्थितानां जनानाम् अवबोधनाय सहायकः भवति।
- समुहपठनम्।
- संस्कृत सम्भाषणम्।
- भाषायाः प्रचारप्रसारश्च।
- पुरातनपुस्तकानां, पाण्डुलिपिनां पठनाय, संरक्षणाय च कार्यशाला एताभिः संस्थाभिः आयोज्यन्ते।
- प्रमाणपत्रं च प्रदीयते।

**समस्यानां समाधानम्**

**उच्चारणदोषसमाधानम् -**

अन्तर्जालद्वारा अधिगमे काले उच्चारणदोषाः प्रायशः समुपलभ्यन्ते। तेषां दोषाणां समाधानाय (AI) कृत्रिमबुद्धी आधारित **स्वरशुद्धिपरीक्षा** इति नाम्ना काचित् पद्धति वर्तते। तया पद्धत्या तेषां दोषाणां निरसनं कर्तुं शक्यम्। अथवा प्रत्येक्षेण गुरुसमिपं गत्वा दोषान् निवारयितुं शक्नुवन्ति।

**प्रविधि-प्रतिबन्धनां समाधानम् –**

प्रायशः प्रद्योगिकि-उपकरणद्वारा अधिगमः आचार्यैः सर्वाशेंन नैव विदितः। तेषां प्रद्योगिकि-उपकरणज्ञानसंबर्धनार्थम् आचार्य-प्रशिक्षणकार्यक्रमः, प्रशिक्षणसप्ताहः, कार्यशालाः एवं च तत् सम्बन्धिकार्यक्रमाः आयोजनीयाः। शिष्याणां यान्त्रिकोपकरण-प्रशिक्षणाय पाठ्यचर्यासु **यान्त्रिकाधिगमः** इति पाठ्यक्रमः संस्थापनीयः। येन प्रविधि-प्रतिबन्धसमस्यानां समाधानं भवितुमर्हति।

**संवादाभावसमस्यायाः समाधानम् –**

अन्तर्जालद्वारा अध्यापने शिष्याणां संलग्नाभावः, एकाग्रताभावः इत्यादयः दोषाः सम्भाव्यन्ते। प्रत्यक्षपद्धत्या अधिगमे अपि बहुशिष्याणां समकालेन शिक्षणाभावादयः समस्याः संदृश्यन्ते। एतासां समेसां समस्यानां समाधानाय प्रत्यक्षपरोक्षप्रणालिद्वयम् आश्रित्य अधिगमे सति सम्वादाभावसमस्यायाः समाधानं भविष्यति।

## ८. उपसंहारः (Conclusion)

वेदपाठशालासु शिक्षणपद्धतिः यद्यपि अत्यन्तगौरवपूर्णा, मौलिकश्च भवति, तथापि इदानींतनयुगे तस्याः जीवन्तता रक्षणीयैव। इयं गुरुकुलपरम्परापद्धतिः ई-लर्निङ्(E-learning) प्रणालीपरम्परायाः न बाधिका, अपि तु संबर्धिका भवति।

गुरुकुलपरम्परायाः मूल्यम्, आचारः, अनुष्ठानम्, आत्मानुशासनं च रक्षणीयम्। तासु परम्परासु एव प्रौद्योगिकीं संयोज्य नवसंस्करणं कल्पनीयम्। एवम् ई-लर्निङ्(E-learning) यान्त्रिकाधिगम माध्यमेन अधिगमे सति वेदपाठशालानां समुन्नतिं भवितुमर्हति। शिष्याणां च अवगमने सरलता सम्पाद्यते। आभारतम् अपि गुरुकुलपद्धत्याः प्रचारप्रसारश्च सर्वजनविदितश्च सम्भवति। अयं शोधपत्रः दर्शयति यत् परम्परायान्त्रकयोः च एकत्र सन्निवेशेन भारतसंस्कृतेः अमृतस्वरूपं विश्वेऽस्मिन् सम्प्रेषणीयम् अस्ति।

## ९. सन्दर्भसूची (References)

1. वेदधारा संस्थानम् – www.vedadhara.com
2. Chinmaya International Foundation – www.chinfo.org
3. Sringeri Vidya Bharati Foundation – www.sringeri.net
4. भारतसर्वकारस्य वेदवाङ्मयसंग्रहः – www.vedicheri-tage.gov.in
5. *Modernization of Gurukula Education*, Narayan R., 2022
6. *Vedic Knowledge & Technology*, Sharma V., Indic Studies Journal, 2020
7. संस्कृतभारती प्रकाशनानि – samskritabharati.in